ALLEN

# SAMPLE PAPER

Subject - Sanskrit

Time : 2.30 Hrs | Class - X | Maximum Marks: 80

(खण्ड–'अ')

प्रश्न 1. वस्तुनिष्ठ प्रश्नाः – (17×1=17)

(1) बुद्धिर्बलवती सदा इति पाठः कस्माद् ग्रन्थात् संकलितः?

(अ) काकल्याः (ब) कथासंग्रहात् (स) शुकसप्ततेः (द) लसल्लतिकायाः

(2) जननी तुल्यवत्सला इति पाठस्य मूल ग्रन्थः कः?

(अ) महाभारतम् (ब) रामायणम् (स) कादम्बरी (द) हर्षचरितम्

(3) उदीरितोऽर्थः केन अपि गृह्यते?

(अ) पण्डितेन (ब) अश्वेन (स) मानवेन (द) पशुना

(4) शीतने जले स्थितप्रज्ञ इव कः तिष्ठति?

(अ) बकः (ब) मीनः (स) मकरः (द) पिकः

(5) करूणा परो गृही कस्मै आश्रयं प्रायच्छत्?

(अ) चौराय (ब) रक्षकपुरूषाय (स) सेवकाय (द) निर्धनजनाय

(6) बुद्धिमान् नरः कीदृशं कर्म न कुर्यात्?

(अ) हितम् (ब) सुखदम् (स) मधुरम् (द) अहितम्

(7) सुरभि पुत्रस्य दैन्य दृष्ट्वा–

(अ) हसति (ब) विहसति (स) उपहसति (द) शोचति

(8) पेष्टा इत्यस्य पदस्य संधि विच्छेदोऽस्ति–

(अ) पेष् + ता (ब) पेस् + ता (स) पेष् + टा (द) पेस् + टा

(9) सुप् + अन्तः इत्यस्य संधिपदमस्ति।

(अ) सुप्न्तः (ब) सुपन्तः (स) सुभ्नतः (द) सुबन्तः

(10) अनुस्वारसन्धेः उदाहरणमस्ति।

(अ) चिदानन्द (ब) कार्य कुरू (स) कश्चित् (द) सिंहोऽत्र

(11) उत्व संधेः उदाहरणमस्ति।

(अ) नमस्ते (ब) पुनरास्ते (स) रामश्च (द) सिंहोऽपि

(12) "बहिः" इति योगे का विभक्तिः भवति?

(अ) पंचमी (ब) षष्ठी (स) सप्तमी (द) तृतीया

(13) "याच्" धातु योगे विभक्तिः भवति?

(अ) प्रथमा (ब) द्वितीया (स) चतुर्थी (द) पंचमी

(14) अपकर्षः इत्यत्र पदे कः उपसर्गः?

(अ) अव (ब) अप (स) अ (द) अव्

(15) दुखस्था इत्यत्रउपसर्ग शब्दं च पृथक् कृत्वा लिखत–

(अ) दुर् + अवस्था (ब) दु + अवस्था (स) दुस् + अवस्था (द) दुर् + वस्था

(16) व्यज् धातु लट् लकार रूपम् अस्ति।

(अ) व्यजति (ब) व्यक्षति (स) व्यजेत् (द) अव्यजत्

(17) "सिंहः सर्वजन्तून् पृच्छति" रेखांकित पदेषु धातुः कः?

(अ) पृष्ट् (ब) पृच्छ् (स) प्रच्तृ (द) प्रच्छ् धातु

प्रश्न 2. निर्देशानुसारं रिक्तस्थानानि पूरयत– (5)

(1) .................... इयं बालिका। (कुमार+ङीप्)

(2) पुस्तकेषु किमपि न ..................। (लिख्+अनीयर्)

(3) .................. स्वर्गे अस्ति। (देव+तल्)

(4) .................... स्वपाठः पठितव्यः। (हरि शब्दस्य तृतीया विभक्तिः एकवचनम्)

(5) ............... यमलौ। (अस्मद् शब्दस्य प्रथमा विभक्तिः द्विवचनम्)

प्रश्न 3. अधोलिखित अपठितं गद्यांश पठित्वा एतदाधारित प्रश्नानाम् उत्तराणि यथानिर्देशम् लिखत–

अस्मिन् संसारे असंख्याः भाषाः सन्ति। तासु भाषासु संस्कृत भाषा सर्वोत्तमा विद्यते। संस्कृता परिष्कृता दोषरहिता भाषा एव संस्कृत भाषा कथ्यते। इयमेव भाषा देवभाषा गीर्वाणगीः, सुखाणी इत्यादिभिः शब्दै सम्बोध्यते। एतानि नामानि एव अस्याः भाषयाः महत्त्वं सूचयन्ति। संस्कृतभाषा जगतः सर्वासां भाषाणां जननी अस्ति। सर्वभाषाणं मूलरूप ज्ञानाय एतस्या आवश्यकता भवति। यादृशं महत् साहित्यं संस्कृत–भाषायाः अस्ति तादृशं अन्यासां भाषाणां नास्ति अस्यामेव भाषायां ब्रहामण–ग्रन्थाः आरण्यकाः अध्यात्मविषय प्रतिपादिका उपनिषदः वेदादयश्च सन्ति। आदिकाव्यं रामायणं वीरकाव्यं महाभारतमपि संस्कृतस्य गौरवं वर्धयतः। अनयोः ग्रन्थयोः विषयं गृहीत्वा एव विशालस्य (संस्कृत) साहित्यस्य रचना सञ्जाता।

(क) एक पदेन उत्तरतः– (1×2=2)

(अ) सर्वोतमा भाषा का विद्यते?

(ब) सर्वभाषाणां मूलरूपं ज्ञानाय कस्याः आवश्यकता भवति।

(ख) पूर्ण वाक्येन उत्तरत– (1×2=2)

(अ) कीदृशी भाषा संस्कृत भाषा कथ्यते?

(ग) अस्य गद्यांशस्य समुचित शीर्षकं लिखत। (1)

(घ) भाषिक कार्यम्ः– (1×3=3)

(अ) 'नामानि' इति कर्तृपदस्य गद्यांशे क्रियापदं किमस्ति?

(ब) 'असंख्याः' इति विशेषणस्य गद्यांशात् विशेष्य पदं चित्वा लिखत।

(स) "एतस्याः .................." इत्यस्य 'एतस्याः' सर्वनाम पदस्थाने संज्ञापदं लिखत।

(खण्ड–'ब')

प्रश्न 4. हिमालयात् गंगा प्रभवति। रेखांकित पदे विभक्तिं तत्कारणं च लिखत। (2)

प्रश्न 5. अधोलिखितौ संख्यावाचि शब्दौ संस्कृतेन लिखत– (1+1=2)

(अ) 131 (ब) 223

प्रश्न 6. वानरः आत्मनं वनराजपदाय योग्यः मन्यते रेखांकित पदेषु प्रश्न निर्माणं कुरूत। (2)

प्रश्न 7. अधोलिखित श्लोकस्य हिन्दी भाषायां सप्रसंग भावार्थ लिखतः– (2)

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत।।

प्रश्न 8. अधोलिखित श्लोकस्यस अन्वयं मञजूषातः पदानि चित्वा पूरयतः– (2)

(मात्रेण, रोहितः, फुर्फुरायते, याति)

अगाध जलसञ्चारी न गर्व याति रोहितः।
अङ्गुष्ठोदक मात्रेण शफरी फुर्फुरायते।।

अन्वयः– अगाधजलसञ्चारी (1) .................... गर्व न (2) .................... अङ्गुष्ठोदक (3) ................... शफरी (4) ..........................

प्रश्न 9. स्वपाठ्यपुस्कात् श्लोकद्वय लिखत यद् अस्मिन् प्रश्नपत्रे न स्यात्। (2)

प्रश्न 10. जननी तुल्यवत्सला इति पाठसारं हिन्दी भाषायां लिखत्। (2)

अथवा

"विचित्रः साक्षी इति पाठ सारं हिन्दी भाषायां लिखत।

(खण्ड–'स')

प्रश्न 11. अधोलिखितं गद्यांश पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतः–

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एक शरीरेण दुर्बलः जवेन गन्तुम् शक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदयमानः अवर्तत। सः वृषभः हलमूढ़वा गन्तुमशक्तः क्षैत्रे पपात। कुद्धः कृषीवलः तमुथ्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः।

(क) एक पदेन उत्तरं लिखत– (1)

(अ) कृषकः काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्?

(ख) पूर्ण वाक्येन उत्तरतः– (2)

(अ) बलीवर्दयोः एकः कीदृशः आसीत्?

(ग) यथानिर्देशम् उत्तरं लिखतः– (2)

(अ) बलीवर्दयोः इति संज्ञा पदस्य गद्यांशे सर्वनाम पदं किं प्रयुक्तम्?

(ब) गद्यांशे 'पपात' इति क्रियायाः कर्तृपदं किम्?

अथवा

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् सः शवः प्रावारकमपसार्य न्यायधीशमभिवाद्य निवेदितवान् मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः अतः निजकृत्यस्य फलं भुङ्क्ष। अस्मिन् चौर्याभियोगे त्वं वर्ष त्रयस्य कारादण्डं लप्स्यसे इति। न्यायधीशः आरक्षिणे काशदण्ड मादिश्च तं जनं ससम्मानं मुक्तवान् अत एवोच्यते–दुष्कराण्यपि काशदण्ड मादिश्च तं जनं ससम्मानं मुक्तवान् अत एवोच्यते–दुष्काराण्यपि कर्माणि मतिवैभवशलिनः। नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।

(क) एक पदेन उत्तरं लिखत– (1)

(अ) केन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ?

(ख) पूर्ण वाक्येन उत्तरतः– (2)

(अ) किं प्रस्तुतवति आश्चर्यमघटत्?

(ग) यथानिर्देशम् उत्तरं लिखतः– (2)

(अ) त्वयाऽहं चोरितायाः .................. अत्र त्वयां इति सर्वनाम पदं कस्मै प्रयुक्तम्?

(ब) चोरितायाः मञ्जूषायाः इत्यनयोः पदयोः विशेष्य पदं किम्।

प्रश्न 12. अधोलिखित पद्यांश पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत–

निमित्तमुद्दिश्च हि यः प्रकुटयति, ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै, कथं जनस्तं परितोषयिष्यति।।
यानानां पङ्क्तयो हानन्ताः कठिनं संसरणम्– शुचि पर्यावरणम्

(क) एक पदेन उत्तरं लिखत– (1)

(अ) जनः कम् उद्देश्य प्रकुप्यति?

(ख) पूर्ण वाक्येन उत्तरतः– (2)

(अ) कः ध्रुवं प्रसीदति?

(ग) यथानिर्देशम् उत्तरं लिखतः– (2)

(अ) सः तस्य अपगमे .................. अत्र तस्य' सर्वनाम पदं कस्मै प्रयुक्तम्?

(ब) 'निर्मितस्य' इति कर्तृपदस्य क्रिया पदं किम् अस्ति।

अथवा

यत् प्रोक्तं येन केनापि तस्य तत्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन सः विवेक इतीरितः।।

(क) एक पदेन उत्तरं लिखत– (1)

(अ) कस्य निर्णयः कर्तुं शक्यः भवेत्?

(ख) पूर्ण वाक्येन उत्तरतः– (2)

(अ) येन केनापि यत् प्रोक्तं तस्य किं कर्तुं शक्यः?

(ग) यथानिर्देशम् उत्तरं लिखतः– (2)

(अ) यत् प्रोक्तं येन केनापि, अत्र क्रियापदं किम्?

(ब) तस्य तत्त्वार्थनिर्णयः अत्र सर्वनाम पदं किम्?

प्रश्न 13. अधोलिखितं नाट्यांश पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतः–

विदूषकः – एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दाकौ निर्भर्त्सयति।

रामः (स्वगतम्) धिङ् मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेव मन्युगर्भैरक्षरैनिर्भर्त्सयति। (सवाष्पमवलोकयति)

रामः – अति दीर्घः प्रवासोऽयं दारूणश्च। (विदूषक मवलोक्य जनान्तिकम्) कुतूहलेनाविष्टो मातरमनयोनमितो वेदितुमिच्छामि। न युक्तं च स्त्रीगत मनुयोक्तुम्, विशेषतस्तपोवने। तत् कोऽत्राभ्युपायः?

(क) एक पदेन उत्तरं लिखत– (1)

(अ) कुशलवयोः भारं नामतो वेदितुं कः इच्छति?

(ख) पूर्ण वाक्येन उत्तरतः– (2)

(अ) कस्यापराधेन तपस्विनी स्वापत्यं निर्भर्त्सयति?

(ग) यथानिर्देशम् उत्तरं लिखतः– (2)

(अ) 'धिङ्' मामेवंभूतम्' अस्मिन् वाक्ये 'माम्' इति पदं कस्मै प्रयुक्तम्?

(ब) नाट्यांशे 'सा तपस्विनी' इति कर्तृपदस्य क्रियापदं किम्?

अथवा

अन्य वानरः – किं न श्रुता त्वया पञ्चतन्त्रोक्तिः
योे न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः।।

काकः – आम् सत्यं कथितं त्वया–वस्तुतः वनराजः भवितुम् तु अहमेव योग्यः।

(उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का–का इति कर्कश ध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्ण, मेध्यामेध्य भक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

(क) एक पदेन उत्तरं लिखत– (1)

(अ) पञ्चतन्त्रोक्तिः कः कथयति?

(ख) पूर्ण वाक्येन उत्तरतः– (2)

(अ) कः नृपः कृतान्तः भवति?

(ग) यथानिर्देशम् उत्तरं लिखतः– (2)

(अ) 'सत्यं कथित त्वया' अत्र 'त्वया'। सर्वनाम पदं कस्मै प्रयुक्तम्।

(ब) 'वित्रस्तान्' इति विशेषणस्य विशेषण पदं किम्?

प्रश्न 14. यथानिर्देशम् उत्तरं लिखतः– (1×3=3)

(अ) कृष्णस्य समीपे। (समस्त पदं लिखत) (ब) पंचपात्रम्। (समास विग्रहं पदं लिखत)

(स) नीलोत्पलम्। (समासस्य नाम लिखत)

प्रश्न 15. मञ्जूषायाः प्रदत्तैः समुचितैः अव्ययपदैः वाक्यानि पूरयत– (3)

(मा, पुरा, सहसा)

(अ) .................. संस्कृतं जनभाषा आसीत्।

(ब) .................. विदधीत न क्रियाम्।

(स) असत्यं .................. वद।

(खण्ड–'द')

प्रश्न 16. स्वं योगेशकुमारः मत्वा राजकीय–उच्च–माध्यमिक–विद्यालयस्य अजयमेरूनगरस्य प्रधानाचार्याय चरित्र प्रमाण पत्र प्राप्त्यर्थ संस्कृते प्रार्थना पत्रमेकं लिखत। (4)

अथवा

भवान् देवदत्तः। स्वानुजं यज्ञदत्तं प्रति अधोलिखत पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत।
(अध्ययने, चिन्ता, तवाग्रजः, पत्रोत्तरं, नीरोगताम्, प्रसन्नाश्च, धनादेशः, चिरात्)

धोलपुरात

दिनांक – 10–11–24

प्रिय अनुज यज्ञदत्त!

शुभाशिषः।

अत्र कुशलं तत्रास्तु। (1) ...................... पत्रं तव नैवाऽगतम्। तवाध्ययनं सम्यगेव चलतीति मन्ये। मया प्रेषितो (2) .................... लब्धो न वा? अत्रत्याः सर्वे जनाः स्वस्थाः (3) .................... सन्ति। पूर्वं मातुः स्वास्थ्यं समीचीनं नासीत् परमिदानी (4) .................... अनुभवति। अतः मातुः विषयेऽपि (5) ..................... न कर्त्तव्या। (6) ................... सावधानतया वर्तनीयम्। (7) .................... शीघ्रमेव देयम्, पत्रप्रेषणे प्रमादो नैव कर्त्तव्यः। तव स्नेहपत्र–प्रतीक्षायाम्।

......................

देवतत्तः

प्रश्न 17. अधः प्रदत्तं चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते अष्ट–वाक्यानि जन्तुशालायाः विषये लिखतः– (4)

(मत्स्यः, पञ्जरे, बकौ, शिशवः, लम्बते, सन्ति, वृक्षाः, पशवः, भगिन्या सह, सिंहः, जन्तुशालायाः, क्रीडतः)



अथवा

मञ्जूषातः उपयुक्तपदानि गृहीत्वा पिता–पुत्रयोः सम्भाषणं लिखत–

(आपणम्, शीघ्रम्, पुस्तकम्, फलानि, करोषि, शतम्, स्यूतम्, आगच्छामि)

पिता – पुत्र! किं (1) ...................... त्वम्?

पुत्रः – (2) .................. पठामि, पितः।

पिता – पुत्र! (3) .................... गत्वा आगच्छसि किम्?

पुत्रः – पितः ! (4) ................. लिखित्वा गच्छामि।

पिता – आपणतः (5) ..................... आनय।

पुत्रः – (6) ................. रूप्यकाणि यच्छतु।

पिता – (7) .................. नीत्वा आपणं गच्छ।

पुत्र – अहं गत्वा शीघ्रम् (8) .....................।

प्रश्न 18. अधोलिखित वाक्येषु केषाञ्चित् चतुर्णां वाक्यानां संस्कृत भाषाया अनुवादं कुरूत– (1×4=4)

(1) मैं संस्कृत व विज्ञान पढ़ता हूँ। (2) कक्ष के बाहर शिक्षक है।

(3) बालक को फल अच्छा लगता है। (4) वृक्ष के उपर पक्षी है।

(5) बालक घर की ओर जा रहे है। (6) तुम वहाँ जाकर पढो।

प्रश्न 19. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथा क्रम संयोजनं कृत्वा लिखत– (3)

(1) एकदा कश्चित् प्रमत्तः गजः तत्र आगतवान्।

(2) अथ सा चटका व्यलपत्।

(3) चटकायाः नीडं भुवि अपतत्, तेन अण्डानि विशीर्णानि।

(4) पुरा एकस्मिन् वने एका चटका प्रतिवसति स्म।

(5) वृक्षस्य अधः आगत्य तस्य शाखा शुण्डेन अत्रोटयत्।

(6) कालेन तस्याः सन्ततिः जाता।